# ॥ श्रीकृष्णस्तोत्रं ब्रह्मवैवर्तपुराणे धर्मकृतम् ॥

.. Krishna stotra by Dharma
from brahmavaivartapurANa ..

sanskritdocuments.org

July 25, 2016

# Document Information

Text title : dharmakRitaM shrIkRiShNastotra brahmavaivartapurANe
File name : krishnastotradharmaBVP.itx
Location : doc_vishhnu
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Dinesh Agarwal dinesh.garghouse at gmail.com
Proofread by : Dinesh Agarwal dinesh.garghouse at gmail.com
Description-comments : brahmavaivartapurANa brahmakhaNDam adhyAya 3 shloka 45-52
Latest update : January 19, 2013
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

# ॥ श्रीकृष्णस्तोत्रं ब्रह्मवैवर्तपुराणे धर्मकृतम् ॥

श्रीधर्म उवाच ।

कृष्णं विष्णुं वासुदेवं परमात्मानमीश्वरम् ।
गोविन्दं परमानन्दमेकमक्षरमच्युतम् ॥ १॥

गोपेश्वरं च गोपीशं गोपं गोरक्षकं विभुम् ।
गवामीशं च गोष्ठस्थं गोवत्सपुच्छधारिणम् ॥ २॥

गोगोपगोपीमध्यस्थं प्रधानं पुरुषोत्तमम् ।
वन्देऽनवद्यमनघं श्यामं शान्तं मनोहरम् ॥ ३॥

इत्युच्चार्य समुत्तिष्ठन् रत्नसिंहासने वरे ।
ब्रह्मविष्णुमहेशांस्तान्संभाष्य स उवास ह ॥ ४॥

चतुर्विंशतिनामानि धर्मवक्त्रोद्गतानि च ।
यः पठेत्प्रातरुत्थाय स सुखी सर्वतो जयी ॥ ५॥

मृत्युकाले हरेर्नाम तस्य साध्यं भवेद्ध्रुवम् ।
स यात्यन्ते हरेः स्थानं हरिदास्यं भवेद्ध्रुवम् ॥ ६॥

नित्यं धर्मस्तं घटते नाधर्मे तद्भतिर्भवेत् ।
चतुर्वर्गफलं तस्य शश्वत्करगतं भवेत् ॥ ७॥

तं दृष्ट्वा सर्वपापानि पलायन्ते भयेन च ।
भयानि चैव दुःखानि वैनतेयमिवोरगाः ॥ ८॥

इति ब्रह्मावैवर्ते धर्मकृतं श्रीकृष्णस्तोत्रम् ।

<ः॒ॽ>

brahmavaivartapurANa brahmakhaNDam adhyAya 3 shloka 45-52

Encoded and proofread by Dinesh Agarwal dinesh.garghouse at gmail.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

.. Krishna stotra by Dharma from brahmavaivartapurANa ..
was typeset on July 25, 2016

Please send corrections to *sanskrit@cheerful.com*